## द्रवमूर्तिस्पर्शयोः श्यः। (२४/३०२०)

द्रवमूर्तौ द्रवकाठिन्ये, [1]स्पर्शे वर्तमानस्य 'श्यैङ गतौ' (धा.पा. ९६४) इत्यस्य धातोर्निष्ठायां [2]परतः सम्प्रसारणं भवति। शीनं घृतम्। शीना वसा। शीनं मेदः। द्रवावस्थायाः काठिन्यं गतमित्यर्थः। 'श्योऽस्पर्शे' (८.२.४७/३०२१) इति निष्ठानत्वम्। स्पर्शे—शीतं वर्तते। शीतो वायुः। शीतमुदकम्। गुणमात्रे[3] तद्वति चास्य शीतशब्दस्य वृत्तिर्द्रष्टव्या। द्रवमूर्तिस्पर्शयोः इति किम्? संश्यानो वृश्चिकः[4]॥

## प्रतेश्च। (२५/३०२२)

श्यः इति वर्तते। प्रतेरुत्तरस्य [5]श्यायतेर्निष्ठायां [6]परतः सम्प्रसारणं भवति। प्रतिशीनः। प्रतिशीनवान्। द्रवमूर्तिस्पर्शाभ्यामन्यत्रापि यथा स्यात् इति सूत्रारम्भः॥

## विभाषाऽभ्यवपूर्वस्य। (२६/३०२३)

श्यः इति वर्तते। अभि अव इत्येवंपूर्वस्य श्यायतेर्निष्ठायां[7] विभाषा सम्प्रसारणं भवति। अभिशीनम् अभिश्यानम्। अवशीनम्, अवश्यानम्। द्रवमूर्तिस्पर्शविवक्षायामपि विकल्पो भवति। अभिशीनं घृतम्, अभिश्यानं घृतम्। अवशीनं [8]मेदः, अवश्यानं मेदः। अभिशीतो वायुः, अभिश्यानः[9]। अवशीतमुदकम्, अवश्यानमुदकम्। सेयमुभयत्रविभाषा द्रष्टव्या। पूर्वग्रहणस्य च प्रयोजनम्, समभिश्यानं, समवश्यानम् इत्यत्र मा भूत् इति केचिद् [10]व्याचक्षते, न किलायमभ्यवपूर्वः समुदायः इति। योऽत्राभ्यवपूर्वः समुदायस्तदाश्रयो विकल्पः कस्मान् न भवति? तस्मात्[11] अत्र भवितव्यमेव। यदि तु नेष्यते ततो यत्नान्तरमास्थेयमस्माद् विभाषा[12]विज्ञानात्। व्यवस्थेयम्। पूर्वग्रहणस्य चान्यत् प्रयोजनं [13]वक्तव्यम्॥

## शृतं पाके। (२७/३०६७)

विभाषा इत्यनुवर्तते। 'श्रा पाके' (धा.पा.८११) इत्येतस्य धातोः ण्यन्तस्य [14]अण्यन्तस्य च पाकेऽभिधेये क्तप्रत्यये परतः शृभावो निपात्यते विभाषा। शृतं क्षीरम्। शृतं हविः। व्यवस्थितविभाषा चेयम्, तेन क्षीरहविषोर्नित्यं शृभावो भवति, अन्यत्र [15]न भवति श्राणा यवागूः श्रपिता यवागूः इति। [16]यदापि बाह्ये प्रयोजके द्वितीयो णिच् [17]उत्पद्यते तदापि नेष्यते, श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेन इति। श्रातिरयमकर्मकः कर्मकर्तृविषयस्य [18]पचेरर्थे वर्तते, [19]स ण्यन्तः अपि प्राकृतं पच्यर्थमाहुः। [20]तदत्र द्वयोरपि शृतमिति इष्यते। शृतं क्षीरं स्वयमेव। शृतं क्षीरं देवदत्तेन[21]। पाकग्रहणं निपातनविषयप्रदर्शनार्थम्, तेन क्षीरहविषोरेव॥

---

1. स्पर्शविषये क. 2. परतः नास्ति फ. 3. गुणिनि च इत्यधिकम् फ, गुणवाचिशब्दात् क. ड. 4. शीतेन संकुचितः इत्यर्थः इत्यधिकम् ग. 5. श्या इत्यस्य धातोः क.फ.ह. 6. परतः नास्ति ग.फ. 7. परतः इत्यधिकम् 8. मेदः नास्ति क.फ. 9. वायुः इत्यधिकम् ह. 10. आहुः ह. 11. अत्र नास्ति फ. 12. विज्ञानात् नास्ति फ. 13. द्रष्टव्यम् फ. 14. अण्यन्तस्य च नास्ति फ. 15. नैवम् फ, न तु ग.क. 16. यदा तु क.ड.फ.ह. 17. उत्पाद्यते ह. 18. पचतेरर्थे क. 19. अण्यन्तः ह. 20. तत्र फ. 21. इति इत्यधिकम् फ.